पक्षतया लिखितं उत्तरमिति यावत्। तृतीयपादः प्रत्याकलिताख्यः तस्मिन् सति क्रियया प्रमाणेन प्रतिपादयेत् साध्यमिति शेषः। भाषोत्तरप्रत्याकलिताख्यपादत्रये सति क्रियया स्वकार्य्यमर्थी साधयेदिति तात्पर्य्यार्थः। कार्य्यक्रियाशब्दौ व्याचष्टे व्यासः "कार्य्यं हि साध्यमित्युक्तं साधनन्तु क्रियोच्यते। द्विभेदा सा पुनर्ज्ञेया मानुषी दैविकी तथेति"। साधनं प्रमाणं प्रत्याकलितस्य तृतीयव्यवहारपादत्वमभ्युपगच्छता स्मृतिचन्द्रिकाकारेणैवमिदं वचो व्याख्यातम्। मिताक्षराकारमते तु तृतीयपादक्रियेति स एवार्थः। साक्षीद्वादशभेद इत्यादिप्रमाणप्रकरणे प्रपञ्चयिष्यामः। याज्ञवल्क्यः "प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्। एषामन्यतमाभावे दिव्यान्यतममुच्यते" इति। दिव्येष्वन्यतममित्यर्थः। कात्यायनः "यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम्। मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः। यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम्"। एकदेशप्राप्ता साध्यैकदेशविषया। अत्र यद्येको वादी मानुषीं साक्ष्याद्यन्यतमां क्रियां स्वपक्षसाधकतयोपन्यस्यत्यन्यस्तु तत्प्रतिपक्षतया दैविकीन्तदर्थादितरवादि-पक्षसिध्यसिध्योः सुलभत्वेन न दिव्यापेक्षेति प्रथमवचनार्थः। एवमेकोऽपि वादी साध्यानेकत्वे साध्यैकदेशमपि यदि प्रमाणेन साधयति तदैकदेशविभावितन्यायेनैकदेशान्तरस्यापि सिद्धेर्वक्ष्यमाणत्वान्न दिव्यावसर इति द्वितीयवाक्यार्थः। दिव्यस्वरूपप्रमाणयोरागमैकगम्यत्वान्मानुषप्रमाणासम्भव एव दिव्यस्य प्रामाण्यमिति मुनिवचननिचयपर्य्यालोचनयावगम्यते। अन्यान्यपि कचित् कचित्केषाञ्चित् प्रमाणानां प्राधान्याभिप्रायेण व्यवस्थापकानि वचनान्यृषीणां यथा "क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु। लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः" इति कात्यायनः। पितामहः "स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेत्। साक्षिभिर्लिखितेनाथ भुक्त्या चैतान् प्रसाधयेत्"। इदमपि साक्ष्यादिसमक्षं स्थावरविषयविवादेषु सुलभमतस्तत्सम्भवान्वेषणमेव कार्य्यमित्येवम्परन्न सर्व्वथा दिव्यपरिहारपरम्। सर्व्वथा साक्ष्याद्यसम्भवेऽपि दिव्याग्रहणे निर्णयाभावप्रसङ्गात्। कात्यायनः "दत्तादत्तेषु भृत्यानां स्वामिनां निर्णये सति। विक्रीयादानसम्बन्धे क्रीत्वा धनमनिच्छति। द्यूते समाह्वये चैव विवादे समुपस्थिते। साक्षिणः साधनं प्रोक्तन्न दिव्यं नच लेख्यकम्। पूगश्रेणीगणादीनां या स्थितिः परिकीर्त्तिता। तस्यास्तु साधनं लेख्यन्न दिव्यन्न च साक्षिणः। द्वारमार्गक्रियाभोग जलवाहादिषु क्रिया। भुक्तिरेव तु गुर्व्वी स्यान्न दिव्यं नच साक्षिणः"। दत्तादत्ते प्रतिश्रुत्याप्रदाने दत्त्वा पुनः प्रत्याहृत्य ग्रहणे वा दत्ताप्रदानिके विवादपद इति यावत्। भृत्यानामित्यादिना वेतनादाने। विक्रीयादानेत्यादिना क्रयविक्रयानुशये इतरद्व्यक्तम्। दत्तादत्तादिषु वृद्धानां लिखितकरणाप्रसिद्धेर्भुक्तेश्चासम्भवात् साक्षिणश्च तादृशविषये सुलभत्वान्मानुषप्रमाणसम्भवे च दिव्यासम्भवान्न दिव्यं नच लेख्यकमित्युक्तम्। पूगादीनां संविदि तु बहुकर्तृकायां लिखितं विना न निर्वाहः सर्व्वेषां व्यवहर्तृत्वान्नोदासीनसाक्षिसम्भवो मानुषसत्त्वे च दिव्यानवकाश इत्यभिसन्धायाभिहितन्न दिव्यं च साक्षिण इति। द्वारमार्गादिष्वपि गमनागमनादिरूपभोगस्यैव परं भावाल्लेख्यस्य चाप्रसिद्धेर्मानुषाभाव एव च दिव्यावकाशान्न दिव्यमित्यादि भुक्तिरेव तु गुर्व्वीति चोक्तम्। एवं सर्व्ववचनानि विवेचनीयानि। अतएव "अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे। न्यासापह्नवने चैव दिव्या सम्भवति क्रियेति" नारदेन सम्भवतीत्युक्तम्। स एव "यदा साक्षी न विद्येत विवादे वदतां नृणाम्। तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः। स्त्रीणां शीलाभियोगे च स्तेयसाहसयोरपि। एष एव विधिर्दृष्टः सर्व्वार्थापह्नवेषु चेति"। कात्यायनः "गूढसाहसिकानान्तु प्राप्तं दिव्यैः परीक्षणम्। युक्तिलेशेङ्गिताकारवाक्चक्षुश्चेष्टितैर्नृणाम्। अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत्। दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत्"। बृहस्पतिः "मणिमुक्ताप्रवालानां कूटकृन्न्यासहारकः। हिंसकोऽन्याङ्गनासेवी परीक्ष्यः शपथैः सदा। महापापाभिशापेषु निःक्षेपहरणे तथा। दिव्यैः कार्य्यं परीक्षेत राजा सत्स्वपि साक्षिषु। चिरन्तनोपांशुकृतचिरनष्टेषु साक्षिषु। प्रदुष्टेषु समानेषु दिव्यैः कार्य्यं विशोधयेत्"। अत्र सत्स्वपि साक्षिष्वित्यनेनैतादृशे विषये साक्षिण एव तावन्न सम्भवन्ति। सम्भवन्तोऽपि वा कथञ्चित्कूटतया प्रायः प्रदुष्टा इति विवक्षितं न तु यथाश्रुतम्। चिरन्तनकृते उपांशुकृते रहसि कृते इत्यनेन लेख्याद्यसम्भवमेवोपलक्षयति। अतएवाग्रे चिरनष्टेषु